PK
81
B5
no. 153
v. 1
pt. 1-9

962299

# PREFACE.

About 30 years ago, as Assistant Secretary of the Asiatic Society of Bengal, I drew the attention of the Council of the Society to the neglected condition of the voluminous Thibetan Xylographs, which were lying unnoticed in its archives, damaged by damp and insects, and I suggested the desirability of getting them catalogued and arranged by some one conversant with that language. Consideration of the question was deferred till Mr. E. T. Atkinson, as President of the Society, took up the matter and entrusted me with that work. Not being able to spare much time and being burdened with my official duties I regret the work was much delayed. While cataloguing, Mr. E. T. Atkinson encouraged me to undertake the editing of the Sher-phyin which extends to one hundred thousand stanzas and is considered as sacred as the Vedas of the Hindus. As no second copy was available, with the permission of the Council I had to rely entirely on my own resources. I have, however, carefully followed the text of the Xylograph, though I have failed to understand several passages which are abstruse and obscure. The Society's edition of the Sher-phyin is therefore no better than a reproduction in types of the Xylograph original. By omitting the repetitions which were numerous the bulk of the work has been brought down to a moderate size.

A translation of the Sher-phyin, which is itself a verbal translation of the Sanskrit Çatasāhasrikā-Prajñā-Pāramitā, however desirable it might be, is beyond my poor acquirements: the language of the Sher-phyin is archaic and the subject matter being mystic Yoga philosophy is abstruse to the extreme. No Llama accessible to me has been able to elucidate any passage, however perspicuous it might be in the Sanskrit original. Constant reference to the Sanskrit original therefore made me familiar with that work, and I suggested that as the Society has already printed the Asta-

8 Mar 1918 Chowkhamba Sans Ser. 3551 Asiatic ... 1902 ...

युज्यते। न श्रोतआपत्तिफलमनागतमिति युज्यते। न श्रोतआपत्तिफलं प्रत्युत्पन्नमिति युज्यते। न सकृदागामिफलमतीतमिति युज्यते। न सकृदागामिफलमनागतमिति युज्यते। न सकृदागामिफलं प्रत्युत्पन्नमिति युज्यते। नाऽनागामिफलमतीतमिति युज्यते। नाऽनागामिफलमनागतमिति युज्यते। नाऽनागामिफलं प्रत्युत्पन्नमिति युज्यते। नाऽर्हत्त्वमतीतमिति युज्यते। नाऽर्हत्त्वमनागतमिति युज्यते। नाऽर्हत्त्वं प्रत्युत्पन्नमिति युज्यते। न प्रत्येकबोधिमतीतेति युज्यते। न प्रत्येकबोधिमनागतेति युज्यते। न प्रत्येकबोधिं प्रत्युत्पन्नेति युज्यते। न मार्गाऽऽकारज्ञतामतीतेति युज्यते। न मार्गाऽऽकारज्ञतामनागतेति युज्यते। न मार्गाऽऽकारज्ञतां प्रत्युत्पन्नेति युज्यते। न सर्व्वाऽऽकारज्ञतामतीतेति युज्यते। न सर्व्वाऽऽकारज्ञतामनागतेति युज्यते। न सर्व्वाऽऽकारज्ञतां प्रत्युत्पन्नेति युज्यते। एवञ्चरञ्छारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां युक्तः इति वक्तव्यः।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् न रूपं सारमिति न दुर्बलमिति युज्यते। न वेदनां सारेति न दुर्बलेति युज्यते। न संज्ञां सारेति न दुर्बलेति युज्यते। न संस्कारान्साराइति न दुर्बलाइति युज्यते। न विज्ञानं सारमिति न दुर्बलमिति युज्यते। न चक्षुः सारमिति न दुर्बलमिति युज्यते। न श्रोत्रं सारमिति न दुर्बलमिति युज्यते। न घ्राणं सारमिति न दुर्बलमिति युज्यते। न जिह्वां सारेति न दुर्बलेति युज्यते। न कायं सारमिति न दुर्बलमिति युज्यते। न मनः



सारमिति न दुर्व्वलमिति युज्यते। न रूपं सारमिति न दुर्व्वलमिति युज्यते। न शब्दं सारमिति न दुर्व्वलमिति युज्यते। न गन्धं सारमिति न दुर्व्वलमिति युज्यते। न रसं सारमिति न दुर्व्वलमिति युज्यते। न स्पर्शं सारमिति न दुर्व्वलमिति युज्यते। न धर्म्मान् साराइति न दुर्व्वलाइति युज्यते। न चक्षुर्व्विज्ञानं सारमिति न दुर्व्वलमिति युज्यते। न श्रोत्रविज्ञानं सारमिति न दुर्व्वलमिति युज्यते। न घ्राणविज्ञानं सारमिति न दुर्व्वलमिति युज्यते। न जिह्वाविज्ञानं सारमिति न दुर्व्वलमिति युज्यते। न कायविज्ञानं सारमिति न दुर्व्वलमिति युज्यते। न मनोविज्ञानं सारमिति न दुर्व्वलमिति युज्यते। न चक्षुःसंस्पर्शः* सारमिति न दुर्व्वलमिति वा युज्यते। न श्रोत्रसंस्पर्शः सारमिति न दुर्व्वलमिति युज्यते। न घ्राणसंस्पर्शः सारमिति वा न दुर्व्वलमिति वा युज्यते। न जिह्वासंस्पर्शः सारमिति न दुर्व्वलमिति युज्यते। न कायसंस्पर्शः सारमिति न दुर्व्वलमिति युज्यते। न मनःसंस्पर्शः सारमिति न दुर्व्वलमिति युज्यते। न चक्षुःसंस्पर्शप्रत्यया वेदना सारेति न दुर्व्वलेति युज्यते। न श्रोत्रसंस्पर्शप्रत्यया वेदना सारेति न दुर्व्वलेति युज्यते। न घ्राणसंस्पर्शप्रत्यया वेदना सारेति न दुर्व्वलेति युज्यते। न

---

* कपुस्तके, ख, ग, घ पुस्तकेषु च संस्पर्शविशेषणयोः सारदुर्व्वलशब्दयोः पुंसिप्रयोगदृश्यते। रूपवेदनादिशब्दानां द्वितीयान्तत्वं पूर्व्वं निर्दिष्टं संस्पर्शादिशब्दानाञ्चात्र प्रथमान्तत्वं। दृग् केनाभिप्रायेणेदृग्। वैषम्यं ग्रन्थकृताकृतं तन्नाऽनुभवपथमधिरोहति। अथवा लेखकदोषः प्रसिद्धिमागतः।

दुर्व्वलादिति युज्यते। नाऽऽनिमित्तं सारमिति न दुर्व्वलमिति युज्यते। नाऽप्रणिहितं सारमिति न दुर्व्वलमिति युज्यते। नाऽभिज्ञाः सारादिति न दुर्व्वलादिति युज्यते। न धारणीमुखानि साराणीति न दुर्व्वलानीति युज्यते। न दशतथागतबलानि साराणीति न दुर्व्वलानीति युज्यते। न चत्वारिवैशारद्यानि साराणीति न दुर्व्वलानीति युज्यते। न चतस्रः प्रतिसम्बिदः सारादिति न दुर्व्वलादिति युज्यते। न महामैत्री सारेति न दुर्व्वलेति युज्यते। न महाकरुणा सारेति न दुर्व्वलेति युज्यते। नाऽष्टादशाऽऽवेणिकबुद्ध-धर्म्माः सारादिति न दुर्व्वलादिति युज्यते। न स्रोतआपत्तिफलं सारमिति न दुर्व्वलमिति युज्यते। न सकृदागामिफलं सारमिति न दुर्व्वलमिति युज्यते। नाऽनागामिफलं सारमिति न दुर्व्वलमिति युज्यते। नाऽर्हत्त्वं सारमिति न दुर्व्वलमिति युज्यते। न प्रत्येक-बोधिं सारेति न दुर्व्वलेति युज्यते। न मार्गाऽऽकारज्ञता सारेति न दुर्व्वलेति युज्यते। न सर्व्वाऽऽकारज्ञता सारेति न दुर्व्वलेति युज्यते। एवञ्शरद्वतीपुत्रबोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां युक्तइति वक्तव्यः।

पुनरपरं शारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् न रूपमस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न वेदनाऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न संज्ञा-ऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न संस्कारा* अस्तीति

* न संस्कारा अस्तीति न नास्तीति पाठः पुस्तकपञ्चके दृश्यते। सन्तीति न सन्तीति पाठोयुक्तः।



न नाऽस्तीति युज्यते न वियुज्यते। न विज्ञानमस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न चक्षुरस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न श्रोत्रमस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न घ्राणमस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न जिह्वामस्तीति* नाऽस्तीति युज्यते न वियुज्यते। न काय-मस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न मनोऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न रूपमस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न शब्दोऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न गन्धोऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न रसोऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न स्पर्शोऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न धर्म्माऽअस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न चक्षुर्व्विज्ञानमस्तीति न नाऽ-स्तीति युज्यते न वियुज्यते। न श्रोत्रविज्ञानमस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न घ्राणविज्ञानमस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न जिह्वाविज्ञानमस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न कायविज्ञानमस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न मनोविज्ञानमस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न चक्षुः संस्पर्शोऽस्तीति न नाऽस्तीति युज्यते न वियु-ज्यते। न श्रोत्रसंस्पर्शोऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न घ्राणसंस्पर्शोऽस्तीति न नाऽस्तीति युज्यते न वियुज्यते। न

* एष पाठः पुस्तकपञ्चके दृश्यते। जिह्वेति पाठोयुक्तः प्रतिभाति।

